दिनाङ्क :- 03.11.2025

प्रात: - 06:55

महिलाक्रिकेट् अन्तिमः -

भारतीय-क्रिकेट-क्रीडायाः ऐतिहासिक क्षणमेतत्, यद् भारतीय-महिला-क्रिकेट-दलेन मुम्बईनगरस्य डॉ. डी.वाई. पाटील क्रीडा अकादमी क्रीडांगणे, अन्तिमचक्रे, दक्षिणाफ्रिकादलं द्विपञ्चाशत् धावनांकैः विजित्य, प्र-प्रथमवारं अन्ताराष्ट्रिय-महिला-एकदिवसीय-विश्व-चषकोपाधिः प्राप्तः ।

पूर्वं प्रथमं स्तोभकत्वं स्वीकृत्य नायिकायाः, हरमनप्रीतकौरस्य नेतृत्वे, भारतेन एकोनशतोत्तर-त्रिशतं धावनांकानां सुदृढं लक्ष्यं निर्धारितम् आसीत् । शफाली वर्मा इत्यनया सप्ताशीतिः अथ दीप्तिशर्मा इत्यनया अष्टपञ्चाशत् धावनांकैः सम्मिलितेन योगदानेन सह भारतेन, पञ्चाशत् क्षेपचक्रेषु सप्त-स्तोभकहानौ अष्टनवत्युत्तर-द्विशतं धावनांकैः स्वपर्यायः समाप्तः आसीत् । तस्य उत्तरे दक्षिण आफ्रिकादेशेन कठिन-प्रतिस्पर्धा प्रदर्शिता, परन्तु सार्ध-त्रिचत्वारिंशत् क्षेपचक्रेषु एव केवलं षट्-चत्वारिंशदुत्तर-द्विशतं धावनांकैः बहिर्गमनं जातम् । शेफाली वर्मा स्व-उत्कृष्टप्रदर्शनस्य कृते उत्तम-क्रीडक-उपाधिं प्राप्तवती । अनेन सह भारतीय-महिला-क्रिकेट-दलेन प्र-प्रथमवारं अन्ताराष्ट्रिय-महिला-एकदिवसीय-विश्व-चषकोपाधिः प्राप्तः । राष्ट्रपति द्रौपदी मुर्मू प्रधानमन्त्री नरेन्द्र मोदी अन्ये च नेतारः भारतीयदलस्य विश्वविजयस्य कृते अभिनन्दनं कृतवन्तः।

एस्टिक्-२०२५

प्रधानमंत्री नरेन्द्र मोदी अद्य नवदिल्लीनगरस्य भारतमण्डपमे, ऐषमः प्रवर्धमान-विज्ञानम् एवं प्रौद्योगिकी नवीनता सम्मेलनं एस्टिक्-२०२५ इत्याख्यम् उद्घाटनं करिष्यति । प्रधानमन्त्री अस्मिन् अवसरे सभां सम्बोधयिष्यति । श्री मोदी देशे

अनुसंधान-विकास-पारिस्थितिकी-तन्त्राय प्रमुखं प्रवर्धनं प्रदातुं एकलक्षकोटि-रूप्यकाणां शोध-विकास-नवाचार-योजना-कोषस्य अपि आरम्भं करिष्यति । अस्याः योजनायाः उद्देश्यम् भारते निजीक्षेत्र-सञ्चालितं अनुसन्धानविकास-पारिस्थितिकीतन्त्रस्य प्रवर्धनम् अस्ति ।

## उपराष्ट्रपति-केरल

उपराष्ट्रपतिः सी पी राधाकृष्णन अद्य केरलस्य द्विदिवसीययात्रायां तिरुवनन्तपुरम् आगमिष्यति । इयं च पदासीनात् पश्चात् तस्य प्रथमा राज्ययात्रा अस्ति । उपराष्ट्रपतिः सी. पी. राधाकृष्णन अद्य तिरुवनन्तपुरम् आगत्य कोल्लमनगरस्य फातिमा माता न्याशनल् कालेज् इत्यस्य वज्रमहोत्सवे मुख्यातिथिरूपेण भागं ग्रहीष्यति ।

## बिहार अभियान :

बिहार विधानसभायाः निर्वाचनस्य प्रथम-चरणस्य कृते प्रचाराभियानं श्वः समाप्तं भविष्यति इति कारणेन प्रचाराः चरमस्थाने प्रवर्तन्ते । एनडीए-महाघटबन्धनस्य वरिष्ठनेतारः निर्वाचन-बद्धेषु निर्वाचनक्षेत्रेषु अनेकानि निर्वाचनसभाः सम्बोधितवन्तः । भाजपा-दलस्य स्टार प्रचारकः एवं प्रधानमन्त्री नरेन्द्रमोदी बिहारस्य राजधान्यां पटनायां मेगा रोड् शो इति पथप्रदर्शने भागं भजितवान् । सहरसा-मण्डलस्य सोनबरसायां राज्यस्य मुख्यमन्त्री तथा जे.डि.यु-अध्यक्षः नीतीशकुमारः सभां सम्बोधितवान् । अपरत्र काङ्ग्रेसनेता राहुलगान्धी, खगरियानगरे जनसभां सम्बोधितवान् । प्रथमचरणस्य एकविंशत्युत्तर-एकशतम् विधानसभाक्षेत्रेषु मतदानं नवम्बर् षड्-दिनाङ्के भविष्यति ।

त्रिशूल- अभ्यासः

भारतीयनौसेनायाः नेतृत्वे त्रिसेवा-अभ्यासस्य त्रिशूल इत्यस्य संचालनं भारतीयसेना, भारतीयवायुसेना इत्यनयोः संयुक्तरूपेण, अस्मिन् मासे त्रयोदश-दिनाङ्कपर्यन्तं निरन्तरं भविष्यति । रक्षामन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत्, अभ्यासस्य उद्देश्यं त्रिषु सेवासु परिचालनप्रक्रियाणां प्रमाणीकरणं समन्वयनं च प्राप्तुं बहुक्षेत्रीय-वातावरणेषु संयुक्त-प्रभावाधारित-सञ्चालनस्य सक्षमीकरणं वर्तते। अस्मिन् राजस्थानस्य गुजरातस्य च क्रीक-मरुभूमिक्षेत्रेषु बृहत्-स्तरीय-सञ्चालनं भविष्यति, तत्सहितं उत्तर-अरब-सागरे उभयचर-सञ्चालन-सहितं व्यापक-समुद्री-सञ्चालनम् अपि भविष्यति ।

राजस्थान - मार्गदुर्घटना :

राजस्थाने फलोडीमण्डलस्य मथोडापुलिसस्थानक-क्षेत्रे मार्गदुर्घटनायां पञ्चादशतः अधिकाः तीर्थयात्रिकाः मृताः अभवन् । व्रणितान् तत्क्षणमेव प्राथमिकचिकित्सायै स्थानीयचिकित्सालये नीतम्, गम्भीररूपेण घातितान् च जोधपुरं प्रेषितवन्तः। प्रधानमन्त्री नरेन्द्रमोदी अथ मुख्यमन्त्री भजनलालशर्मा मृत-परिवाराणां कृते स्तीव-शोक-संवेदनां प्रकटितवन्तौ । सामाजिक-सञ्जाल-माध्यमे प्रधानमन्त्री-कार्यालयेन मृतक-परिवार-सदस्येभ्यः द्विलक्षरूप्यकाणां तथा व्रणितानां कृते पञ्चाशत् सहस्र-रूप्यकाणाम् अनुग्रहराशिः च घोषितः ।